# Raghuvaṃśam: Second Canto

## Course Code – VK103

## BA Sanskrit and MA Sanskrit

**Course Category: Elective** **Schedule of Offering: Odd Semester 2021**

**Course Credit Structure: 3**

- **Lecture: 3**
- **Tutorial: 0**
- **Practical: 0**

**Contact Hours per week: 3**

### 1. Introduction

काव्याध्ययनस्य प्रयोजनं बहुविधम् इति सर्वेषाम् विदितम् एव। रसानन्दश्चास्य परमं प्रयोजनम्। कापि भाषा ज्ञाता चेदपि तद्व्यवहृतौ माधुर्यं स्वारस्यम् औचित्यविवेकश्च तत्काव्याध्ययनेनैव सिद्ध्यति इति अनुभवः प्रायः सर्वेषां विपश्चिताम्। यतो हि भूयांसो वाग्विन्यासादयो विशेषाः काव्यैरेव वेत्तुं शक्याः। तदिदं काव्याध्ययनं भाषाप्रपञ्चस्यापि द्वारम्। यदि कश्चन काव्यभागः प्रतिपदं प्रकृतिप्रत्ययविवेकेन सन्धिसमासादिचिन्तनेन च सहितम् अधीयेत तर्हि भाषा सम्यग् अधिगता भविष्यति। अत एव **शतश्लोकेन पण्डितः** इत्युक्तिः प्रथतेतमाम्। संस्कृतिसमुदाचारादयोऽपि काव्येभ्यो विदिता भवन्ति। तदेतैः हेतुभिः सर्वविधोऽपि जनः कांश्चन काव्यभागान् पिपठिषति।

कालिदासीया काव्यसंस्कृतिः अतितमां विशिष्टा वाचाम् अगोचरश्च। विशिष्य रघुवंशस्य द्वितीयः सर्गः भूयसीभिः वाग्विच्छित्तिभिः अलङ्कृतिभिः अर्थगाम्भीर्येण च समुज्ज्वलो वरीवर्ति। तस्मात् स काव्यभागः अत्र उपात्तो वर्तते। अत्र हि तत्रत्यं प्रतिपद्यम् अन्वयक्रम-व्याकरणविशेष-अलङ्कारादिस्वारस्यानुसन्धानैः सहितम् अध्यापयिष्यते।

### 2. Course Objectives

अस्य पाठ्यक्रमस्य लक्ष्याणि –

- काव्यस्य महाकाव्यस्य च लक्षणस्वरूपप्रयोजनानां ज्ञानम्
- निर्दिष्टस्य काव्यभागस्य प्रतिपद्यम् अन्वयानुसारार्थस्य भावार्थस्य च अवगमः
- पदानां व्युत्पत्ति-विग्रहादीनां परिशीलनम्
- निर्दिष्टस्य काव्यभागस्य अलङ्कार-समुदाचारादिस्वारस्यानाम् अनुशीलनम्
- कस्यचित् काव्यस्य विभिन्नस्वारस्यानुसन्धानसहिते अध्ययने दृष्टेः प्राप्तिः

### 3. Outcomes:

अस्य पाठ्यक्रमस्य अध्येतारः –

- काव्यस्य महाकाव्यस्य च लक्षण-स्वरूप-प्रयोजनानां ज्ञानं प्राप्स्यन्ति।
- निर्दिष्टस्य काव्यभागस्य प्रतिपद्यम् अन्वयानुसारार्थं भावार्थं च ज्ञास्यन्ति। अदृष्टपूर्वस्यापि कस्यचित् पद्यस्य पदानाम् अन्वयः कथं प्राप्तव्यः इति अवगमिष्यन्ति।
- प्रतिपदं व्युत्पत्ति-विग्रहादीनां परिशीलनेन पदानाम् अर्थः कथं बोद्धव्यः इति ज्ञास्यन्ति।
- अलङ्कारविशेषाणां परिचयं प्राप्स्यन्ति, काव्यान्तरेषु तान् अभिज्ञातुं समर्थाश्च भविष्यन्ति।
- कस्यापि काव्यविशेषस्य विभिन्नैः प्रकारैः अनुसन्धाने आवश्यकीं दृष्टिं प्राप्स्यन्ति।

### 3. Pre-requisites

संस्कृतावगमनक्षमता प्रबलाध्ययनेच्छा च अत्रापेक्षिते स्तः। यदि संस्कृतभाषाज्ञानं देवनागरीलिपि-परिचयश्च स्यात् तर्हि उत्तमं भविष्यति।

### 4. Readings

1. रघुवंशम्, मल्लिनाथकृतसञ्जीविनीटीकया हेमाद्रिवल्लभादिटीकागतविशिष्टांशैश्च समुल्लसितम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली
2. Raghuvamśa, M. R. Kale, M.L.B.D., Delhi

### 5. Module-wise topics

**Module 1 – अवतरणिका** **07**

Topics –

- महाकाव्यलक्षणम् 02
- कालिदासः तत्कृतयश्च 01
- रघुवंशपरिचयः 01
- प्रथमसर्गस्य आद्याः दश श्लोकाः 03

Readings -

- Kāvyādarśa, 1st chapter, Bhandarkar Oriental Research Institute
- Kālidāsa, K.S.Ramaswami Shastri, (1933) https://archive.org/details/in.gov.ignca.8928/page/n5/mode/2up
- Raghuvamśa of Kālidasa, Introduction, M. R. Kale, M.L.B.D., Delhi https://archive.org/details/raghuvamsha_with_sanjivini_edited_by_mr_kale/mode/2up
- रघुवंशमहाकाव्यम्, Introduction, Chaukhambha Sanskrit Prakashan, Varanasi
- रघुवंशमहाकाव्यम्, (1st canto), Rashtriya Sanskrit Sansthan, New Delhi

**Module 2 – दिलीपकृतं धेनोरनुचरणम् (०१-२५ श्लोकाः) 12**

Topics –

- वनं प्रति प्रस्थानम् (01-02) 01
- दिलीपेन श्रद्धया नन्दिन्याः अनुसरणम् (03-08) 03
- वने द्रुमादिभिः कृतः राज्ञः उपचारः (09-14) 03
- सायम् आश्रमं प्रति प्रत्यागमनम् (15-18) 02
- दम्पतिभ्यां विहिता नन्दिनीसपर्या (19-25) 03

Readings -

- रघुवंशमहाकाव्यम्, Rashtriya Sanskrit Sansthan, New Delhi, द्वितीयसर्गे ०१-२५ श्लोकाः

**Module 3 – सिंहेन नन्दिन्याम् आक्रमणं दिलीपं प्रति वचनं च (26-41) 08**

Topics –

- सिंहेन नन्दिन्याम् आक्रमणम् (26-27) 01
- सिंहनिग्रहाय दिलीपस्य यत्नः वैफल्यं च (28-32) 02

- राजानं प्रति सिंहस्य उक्तयः (33-41) 05

Readings -

- रघुवंशमहाकाव्यम्, Rashtriya Sanskrit Sansthan, New Delhi, **द्वितीयसर्गे २६-४१ श्लोकाः**

**Module 4 – सिंहदिलीपयोः संवादः (42-59) 08**

Topics –

- 'गां मुञ्च मां खाद च' इति राज्ञो निवेदनम् (42-45) 02
- 'इदमयुक्तम्' इति सिंहस्य सयुक्तिकं प्रतिबोधनम् (46-51) 02
- राज्ञा पुनरपि स्वप्रार्थनायाः समर्थनम् (52-58) 03
- राज्ञा सिंहाय आहारत्वेन स्वनिवेदनम् (59) 01

Readings -

- रघुवंशमहाकाव्यम्, Rashtriya Sanskrit Sansthan, New Delhi, **द्वितीयसर्गे ४२-५९ श्लोकाः**

**Module 5 – नन्दिन्यनुग्रहः (60-75) 10**

Topics –

- दिलीपस्योपरि पुष्पवृष्टिः नन्दिन्याः अनुग्रहवाचश्च (60-63) 02
- दिलीपेन सन्तानापेक्षाप्रकटनं नन्दिन्याः तदनुग्रहश्च (64-69) 03
- सपत्नीकस्य राज्ञः स्वपुरीं प्रति गमनम् (70-74) 02
- सुदक्षिणायाः गर्भधारणम् (75) 01
- पाठस्य उपसंहारः 02

Readings -

- रघुवंशमहाकाव्यम्, Rashtriya Sanskrit Sansthan, New Delhi, **द्वितीयसर्गे ६०-७५ श्लोकाः**

## 6. Pedagogy

अत्र तावद् भाषाव्युत्पत्तिसम्पादनं काव्यस्वारस्यानुसन्धानं च लक्ष्यीकृत्य पाठनं भविष्यति। प्रतिपद्यं पदच्छेदः पदार्थोक्तिः अन्वयः इत्यादिविधिना व्याख्यानं करिष्यते। शब्दधातुरूपाणि पदानां व्युत्पत्तिः सन्धिकार्याणि विग्रहवाक्यानि चापि तत्तत्प्रसङ्गेषु दर्शयिष्यन्ते। अस्यां प्रक्रियायाम् अध्येतारः निरन्तरं सम्प्रेरयिष्यन्ते, येन ते स्वयमेव अन्वयादीनां प्राप्तौ समर्थाः भविष्यन्ति। काले काले केषाञ्चन पद्यानां व्याख्यानं अध्येतृभिः एव कारयिष्यते। प्रतिकक्ष्यम् आदौ पूर्वदिने पठिताः विषयाः छात्रैः स्मरणबलेन प्रस्तोतव्याः भविष्यन्ति। छात्राणां हिताय सुखबोधाय च विशिष्टोपन्यासादयः अन्येऽपि अंशाः कदाचित् स्थानं भजेरन्।

## 7. Evaluation Pattern

अस्मिन् पत्रे मौल्यमापनम् इमान् अंशान् आधारीकरिष्यति -

- Weekly quiz and Presentation : 20%
- Assignments : 20%
- Mid-term Examination : 25%
- End-Term Examination : 35%

Total : 100%